M. T. B. COLLEGE, SURAT

Manuscripts Library

No. Ref.
Ser. 415

Title: Vedanta Sara

415

वेदान्त सारः

	Vedanta Sara		Title
		Sadānand	Author
			Editor
			Year, Vols.
			Publisher
415			Remarks

रूपिण इति किं बहुना देयं देहयात्रामात्रार्थमिछानिछापरेछाप्रापित
निसुखदुःखलक्षणान्यारब्धफलान्यनुभवन्नंतःकरणाभासादीनाम
वभासकः संस्तदवसाने प्रत्यगानंदपरब्रह्मणि प्राणे लीने सत्यज्ञानतत्का
र्यसंस्काराणामपि विनाशात्परमकैवल्यमानंदैकरसमखिलभेदप्रतिभासर
हितमखंडं ब्रह्मावतिष्ठते। न तस्य प्राणा उत्क्रामंत्यत्रैव समवनीयंते। विमुक्त
श्च विमुच्यत इत्यादिश्रुतेः॥ ॥इति श्रीमत्परमहंसपरिव्राजकाचार्यस
दानंदकृतो वेदांतसारः समाप्तः॥ ॥शुभमस्तु॥ ॥छ॥ ॥श्री॥ ॥

त्यादिश्रुतेः। उक्तं च। [illegible] बुद्ध [illegible]
वः। तथापि कुर्वन्ति नि [illegible] ताप्रतीतिनिश्चयः
[illegible] नात्पूर्वं विद्यमानानामेवाहारविहारादीनामनुवृत्तिवच्छुभवा
सनानामेवानुवृत्तिर्भवति। [illegible]
तत्त्वस्य यथेष्टाचरणं यदि [illegible]
[illegible]
[illegible] ज्ञानसाधनान्यद्वेष्टृत्वादय [illegible]
न्नात्मावबोधस्य [illegible] त्वादयो गुणाः अयत्नतो भवंत्यस्य न तु साधन

वेदांत सार ।२२।

ज्ञानतत्कार्यसंचितकर्मसंशयविपर्ययादीनामपिबाधितत्वादखिलबंध
रहितोब्रह्मनिष्ठः॥भिद्यतेहृदयग्रंथिश्छिद्यंतेसर्वसंशयाः॥क्षीयंतेचास्यक
र्माणितस्मिन्दृष्टेपरावरेइत्यादिश्रुतेः॥अयंतुव्युत्थानसमयेमांसशोणि
तमूत्रपुरीषादिभाजनेनशरीरेणांध्यमांद्यपटुत्वादिभाजनेनेंद्रियग्रा
मेणाशनायापिपासाशोकमोहादिभाजनेनांतःकरणेनचपूर्वपूर्ववासनया
क्रियमाणानिकर्माणिभुज्यमानानिज्ञानाविरुद्धारब्धफलानिच।पश्यन्न
पिबाधितत्वात्परमार्थतोनपश्यति।यथेंद्रजालमितिज्ञानवांस्तदिंद्रजा
लंपश्यन्नपिपरमार्थमिदमितिनपश्यति।सचक्षुरचक्षुरिवसकर्णोकर्णइव

ऽखंडवस्त्वनवलंबनंकषायः॥अखंडवस्त्ववलंबनेनापिचित्तवृत्तेःसवि
कल्पकानंदास्वादनंरसास्वादः॥समाध्यारंभसमयेसविकल्पकानंदास्वा
दनंवा।अनेनविघ्नचतुष्टयेनविरहितंचित्तंनिर्वातदीपवदचलंसदखंड वेदांत
चैतन्यमात्रमवतिष्ठतेयदातदानिर्विकल्पकसमाधिरित्युच्यते।तदुक्तं।लयेसं सा० ८
बोधयेच्चित्तंविक्षिप्तंशमयेत्पुनः॥सकषायंविजानीयात्समप्राप्तंनचालयेत्। ।२७
नास्वादयेद्रसंतत्रनिःसंगःप्रज्ञयाभवेदिति।यथादीपोनिवातस्थोनेंगते
सोपमास्मृतेतिच।अथजीवन्मुक्तलक्षणमुच्यते।जीवन्मुक्तोनामस्वस्वरू
पाखंडब्रह्मज्ञानेनतदज्ञानबाधनद्वारास्वस्वरूपाखंडब्रह्मणिसाक्षात्कृते

स्वाध्यायेश्वरप्रणिधानानि नियमाः। करचरणादिसंस्थानविशेषलक्ष
णानि पद्मकस्वस्तिकादीन्यासनानि। रेचकपूरककुंभकलक्षणाः प्राणनिग्र
होपायाः प्राणायामाः। इन्द्रियाणां स्वस्वविषयेभ्यः प्रत्याहरणं प्रत्याहारः। अद्वि
तीयवस्तुन्यंतरिन्द्रियधारणं धारणा। तत्राद्वितीयवस्तुनि विच्छिद्य विच्छिद्यांत
रिन्द्रियवृत्तिप्रवाहो ध्यानम्। समाधिस्तूक्तः सविकल्पक एव। अस्यांगिनो निर्वि
कल्पकस्य लयविक्षेपकषायरसास्वादलक्षणाश्चत्वारो विघ्नाः संभवंति। लयस्ता
वत्। अखंडवस्त्वनवलंबनेन चित्तवृत्तेर्निद्रा। अखंडवस्त्वनवलंबनेन चित्तवृत्तेरन्या
वलंबनं विक्षेपः। लयविक्षेपाभावेऽपि चित्तवृत्ते रागादिवासनया स्तब्धीभावा

परमद्वितीयं नित्यमेकमक्षरं। अलेपकं सर्वगतं यदद्वयं तदेव चाहं सततं
विमुक्त ॐ इति। निर्विकल्पकस्तु ज्ञातृज्ञानादिविकल्पलयापेक्षयाऽद्वि
तीयवस्तुनि तदाकाराकारितायाश्चित्तवृत्तेरतितरामेकीभावेनावस्थानं। वेदांत
तदा जलाकाराकारितलवणानवभासेन जलमात्रावभासवदद्वितीयव सार
स्त्वाकाराकारितचित्तवृत्त्यनवभासेनाद्वितीयवस्तुमात्रमवभासते। ततश्चा १९।
स्य सुषुप्तेश्चाभेदशंका न भवति। उभयत्र वृत्त्यभाने समानेऽपि तत्सद्भावासद्भावमा
त्रेणानयोर्भेदोपपत्तेः। अस्यांगानि यमनियमासनप्राणायामप्रत्याहारधारणा
ध्यानसमाधयः। तत्राहिंसासत्यास्तेयब्रह्मचर्यापरिग्रहा यमाः। शौचसंतोषतपः

रुपपत्तिः। यथा तत्र। यथा सोम्यैकेन मृत्पिंडेन सर्वं मृन्मयं विज्ञातं स्या
द्वाचारंभणं विकारो नामधेयं मृत्तिकेत्येव सत्यमित्यादावद्वितीयवस्तुसाध
ने विकारस्य वाचारंभणमात्रत्वं युक्तिः श्रूयते। मननं तु श्रुतस्याद्वितीयवस्तुनो
वेदांतानुगुणयुक्तिभिरनवरतमनुचिंतनं। विजातीयदेहादिप्रत्ययरहिता
द्वितीयवस्तुसजातीयप्रत्ययप्रवाहो निदिध्यासनं। समाधिर्द्विविधः। सविकल्पको
निर्विकल्पकश्चेति। तत्र सविकल्पको नाम ज्ञातृज्ञानादिविकल्पलयानपेक्षयाद्वि
तीयवस्तुनि तदाकाराकारितायाश्चित्तवृत्तेरवस्थानं। तदा मृन्मयगजादिभानेपि मृ
द्भानवद्द्वैतभानेप्यद्वैतं वस्तु भासते। तदुक्तमभिनाय। दृशिस्वरूपं गगनोपमं

पादनमभ्यासः। यथा तत्रैवाद्वितीयवस्तुनो मध्ये तत्त्वमसीति नवकृत्व वेदांत
त्वः प्रतिपादनं। प्रकरणप्रतिपाद्यस्य प्रमाणांतराविषयीकरणमपूर्वं। सार
यथा तत्रैवाद्वितीयवस्तुनो मानांतराविषयीकरणं। फलं तु प्रकरणप्रति
पाद्यात्मज्ञानस्य तदनुष्ठानस्य वा तत्र तत्र श्रूयमाणं प्रयोजनं। यथा तत्राचार्य
वान्पुरुषो वेद तस्य तावदेव चिरं यावन्न विमोक्ष्येऽथ संपत्स्य इत्यद्वितीयवस्तुज्ञा ।१८
नस्य तत्प्राप्तिः प्रयोजनं श्रूयते। प्रकरणप्रतिपाद्यस्य तत्र तत्र प्रशंसनमर्थवा
दः। यथा तत्रोत तमादेशमप्राक्ष्यो येनाश्रुतं श्रुतं भवत्यमतं मतमविज्ञातं विज्ञा
तमित्यद्वितीयवस्तुप्रशंसनं। प्रकरणप्रतिपाद्यार्थसाधने तत्र तत्र श्रूयमाणा युक्ति

मंधकारगतं घटपटादिकं॥ विषयीकृत्य तद्गताज्ञानांधकारनिरसनपुरः
सरं स्वप्रभया तदपि भासयतीति। एवंभूतस्य स्वस्वरूपचैतन्यसाक्षात्कार
पर्यंतं श्रवणमनननिदिध्यासनसमाध्यनुष्ठानस्यापेक्षितत्वात्। तेपि प्रद
र्श्यंते। श्रवणं नाम षड्विधलिंगैरशेषवेदांतानामद्वितीयवस्तुनि तात्पर्याव
धारणम्। लिंगानि तूपक्रमोपसंहाराभ्यासापूर्वताफलार्थवादोपपत्त्याख्या
नि। प्रकरणप्रतिपाद्यस्य तदाद्यंतयोरुपपादनमुपक्रमोपसंहारौ। यथा छांदो
ग्ये षष्ठप्रपाठके प्रकरणप्रतिपाद्यस्याद्वितीयवस्तुन एकमेवाद्वितीयमित्यादावै
तदात्म्यमिदं सर्वमित्यंते च प्रतिपादनम्। प्रकरणप्रतिपाद्यस्य तन्मध्ये पौनःपुन्येन प्रति

दर्पणाभावे मुखप्रतिबिंबस्य मुखमात्रत्ववत्प्रत्यगभिन्नपरब्र
ह्ममात्रं भवति। एवं च सति मनसैवानुद्रष्टव्यं यन्मनसा न मनुत इत्य वेदांत
नयोरविरोधः। वृत्तिव्याप्यत्वांगीकारेण फलव्याप्यत्वप्रतिषेधप्रतिपादना सार ८
त्। तदुक्तं। फलव्याप्यत्वमेवास्य शास्त्रकृद्भिर्निवारितं। ब्रह्मण्यज्ञानना
शाय वृत्तिव्याप्तिरपेक्षितेति। स्वयंप्रकाशमानत्वान्नाभास उपयुज्यत इति ।१३।
वा। जडपदार्थाकाराकारितचित्तवृत्तेर्विशेषोस्ति। तथा हि। अयं घट इति। घटा
काराकारितचित्तवृत्तिरज्ञातं घटं विषयीकृत्य तद्गताज्ञाननिरसनपुरः
सरं स्वगतचिदाभासेन जडमपि भासयति। यथा प्रदीपप्रभामंडल

चिद्वावाक्येनाखंडार्थेऽवबोधितेऽधिकारिणोऽहं नित्यशुद्धबुद्धमुक्तसत्यस्व
भावपरमानंदानंताद्वयं ब्रह्मास्मीत्यखंडाकाराकारिता चित्तवृत्तिरुदेति।
सा तु चित्प्रतिबिंबसहिता सती प्रत्यगभिन्नमज्ञातं परंब्रह्म विषयीकृत्य तद्गता
ज्ञानमेव बाधते। तदा पटकारणतंतुदाहे पटदाहवदखिलकारणेऽज्ञाने बाधि
ते सति तत्कार्यस्याखिलस्य बाधितत्वात्तदंतर्भूता खंडाकाराकारिता चित्तवृत्ति
रपि बाधिता भवति। तत्र प्रतिबिंबितं चैतन्यमपि यथा दीपप्रभादित्यप्रभावभा
सनाऽसमर्था सती तयाऽभिभूता भवति। तथा स्वयंप्रकाशमानप्रत्यगभिन्नप
रब्रह्मावभासनानर्हतया तेनाभिभूतं सत् स्वोपाधिभूताखंडवृत्तेर्बाधितत्वा

यल्लक्षणायाऽसंभवात्। भागान्तरेण तदर्थप्रते लक्षणाया पुनस्तत्र
तीत्यपेक्षाभावात्। तस्माद्यथा सोयं देवदत्त इति वाक्यं तदर्थो वा तत्का वेदांत
लैतत्कालविशिष्टदेवदत्तलक्षणस्य वाक्यार्थस्यांशे विरोधाद्विरुद्धतत्का सार
लैतत्कालविशिष्टत्वांशं परित्यज्याविरुद्धं देवदत्तांशमात्रं लक्षयति तथा तत्त्वमसि
वाक्यं तदर्थो वा परोक्षत्वापरोक्षत्वादिविशिष्टचैतन्यैकत्वलक्षणस्य वाक्या ॥१२॥
र्थस्यांशे विरोधाद्विरुद्धं परोक्षत्वापरोक्षत्वादिविशिष्टत्वांशं परित्यज्याऽवि
रुद्धमखंडचैतन्यमात्रं लक्षयतीति॥ अथाधुनाहं ब्रह्मास्मीत्यनुभववा
क्यार्थो वर्ण्यते। एवमाचार्येणाध्यारोपापवादपुरःसरं तत्त्वंपदार्थौ शोध

त्रशोणोधावतीतिवाक्यवदजहल्लक्षणापिनसंभवति।तत्रशो
णगुणगमनलक्षणस्यवाक्यार्थस्यविरुद्धत्वात्तदपरित्यागेनतदाश्र
याश्वादिलक्षणयातद्विरोधपरिहारसंभवादजहल्लक्षणासंभवति।
अत्रतुपरोक्षत्वापरोक्षत्वादिविशिष्टचैतन्यैकत्वस्यवाक्यार्थस्यविरुद्ध
त्वादपरित्यागेनतत्संबंधिनोयस्यकस्यचिदर्थस्यलक्षितत्वेपितद्विरोधा
परिहारादजहल्लक्षणानसंभवत्येव।नचतत्पदंत्वंपदंवास्वार्थविरुद्धांशपरि
त्यागेनांशांतरसहितंतत्पदार्थंत्वंपदार्थंवालक्षयतु।अतःकथंप्रकारांत
रेणभागलक्षणांगीकरणमितिवाच्यं।एकेनपदेनस्वार्थांशपदार्थांतरोभ

षतोविरुद्धत्वाद्वाक्यार्थमशेषंपरित्यज्यतत्संबंधितीरलक्षणायायुक्तत्वा
ज्जहल्लक्षणासंगच्छते।अत्रतुपरोक्षापरोक्षचैतन्यैकत्वलक्षणस्यवाक्या
र्थस्यभागमात्रेविरोधाद्भागांतरमपिपरित्यज्यान्यलक्षणायापुनरयुक्तत्वा वेदान्त
ज्जहल्लक्षणानसंगच्छते।नचगंगापदंस्वार्थपरित्यागेनतीरपदार्थंयथालक्ष सार
यतितथातत्पदंत्वंपदंवास्वार्थपरित्यागेनतत्पदार्थंत्वंपदार्थंवालक्षयतु। ।१५।।
अतःकुतोजहल्लक्षणानसंगच्छतइतिवाच्यं।तत्रतीरपदाश्रवणेनतदर्था
प्रतीतौलक्षणयातत्प्रतीत्यपेक्षायामपितत्त्वंपदयोःश्रूयमाणत्वेनतदर्थ
प्रतीतौलक्षणयापुनरन्यतरपदेनान्यतरपदार्थप्रतीत्यपेक्षाभावात्।अ

वाक्यार्थो न संगच्छते। तत्र तु नीलपदार्थनीलगुणस्योत्पलपदार्थोत्पल
द्रव्यस्य च शौक्ल्यपटादिव्यावर्त्तकतयान्योन्यविशेषणविशेष्यभावसं
सर्गस्यान्यतरविशिष्टस्यान्यतरस्य तदैक्यस्य वा वाक्यार्थत्वांगीकारे प्रमाणां
तरविरोधाभावाद्वाक्यार्थः संगच्छते। अत्र तु तदर्थपरोक्षत्वादिविशिष्टचै
तन्यस्य त्वमर्थापरोक्षत्वादिविशिष्टचैतन्यस्य चान्योन्यभेदव्यावर्त्तकतया वि
शेषणविशेष्यभावसंसर्गस्यान्यतरस्य तदैक्यस्य वा वाक्यार्थत्वांगीकारे प्रत्यक्षा
दिप्रमाणविरोधाद्वाक्यार्थो न संगच्छते। अत्र तु गंगायां घोषो वसतीतिवज्जह
ल्लक्षणा न संगच्छते। तत्र गंगाघोषयोराधाराधेयभावलक्षणस्य वाक्यार्थस्याशे

लविशिष्टदेवदत्तस्य वान्योन्यभेदव्यावर्त्तकतया विशेषणविशेष्यभावः।
तथात्रापि वाक्ये तत्पदार्थपरोक्षत्वादिविशिष्टचैतन्यस्य त्वंपदार्थापरोक्ष वेदांत
त्वादिविशिष्टचैतन्यस्य त्वंपदार्थापरोक्षत्वादिविशिष्टचैतन्यस्य चान्योन्य सार
भेदव्यावर्त्तकतया विशेषणविशेष्यभावः। लक्ष्यलक्षणसंबंधस्तु यथा तत्र
सशब्दायंशब्दयोस्तदर्थयोर्वा विरुद्धतत्कालैतत्कालविशिष्टत्वपरित्यागेना ॥१८॥
विरुद्धदेवदत्तेन सह लक्ष्यलक्षणभावः। तथात्रापि वाक्ये तत्त्वंपदयोस्तदर्थयोर्वा
विरुद्धपरोक्षत्वापरोक्षत्वादिविशिष्टत्वपरित्यागेनाविरुद्धचैतन्येन सह लक्ष्य
लक्षणभावः। इयमेव भागलक्षणेत्युच्यते॥ अस्मिन् वाक्ये नीलमुत्पलमितिवाक्य

दार्थयो। विशेषणविशेष्यभावः प्रत्यगात्मपदार्थयोर्लक्ष्यलक्षणभावश्चेति
। तदुक्तं। सामानाधिकरण्यंच विशेषणविशेष्यता। लक्ष्यलक्षणसंबंधः प
दार्थप्रत्यगात्मनामिति। सामानाधिकरण्यसंबंधस्तावत्। यथा सोयंदे
वदत्त इत्यस्मिन्वाक्ये तत्कालविशिष्टदेवदत्तवाचकसशब्दस्यैतत्कालविशि
ष्टदेवदत्तवाचकायंशब्दस्यचैकस्मिन् पिंडे तात्पर्यसंबंधः। तथा तत्वमसि
वाक्ये परोक्षत्वादिविशिष्टचैतन्यवाचकतत्पदस्यापरोक्षत्वादिविशिष्टचै
तन्यवाचकत्वंपदस्यचैकस्मिंश्चैतन्ये तात्पर्यसंबंधः। विशेषणविशेष्यभावसं
बंधस्तु। यथा तत्रैव वाक्ये सशब्दार्थतत्कालविशिष्टदेवदत्तस्यायंशब्दार्थैतत्का

ज्ञानोपहितचैतन्यंचैश्वरादिकमेतदाधारभूतानुपहितचैतन्यं तुरीयं ब्रह्म मात्रं भवति
आभ्यां अध्यारोपापवादाभ्यां तत्वंपदार्थशोधनमपि सिद्धं भवति। तथा हि। अज्ञानादि वे ष्टं त
समष्टिरेतदुपहितं सर्वज्ञत्वादिविशिष्टचैतन्यमेतदनुपहितं चैतन्यं त्रयं तप्तायःपिंडवदेक सार
त्वेनावभासमानं तत्पदवाच्यार्थो भवति। एतदुपाध्युपहिताधारमनुपहितचैतन्यं तत्पदल
क्ष्यार्थो भवति। अज्ञानादिव्यष्टिरेतदुपहितमल्पज्ञत्वादिविशिष्टचैतन्यमेतदनुपहितं चैतन्
यं तत्त्रयं तप्तायःपिंडवदेकत्वेनावभासमानं त्वंपदवाच्यार्थो भवति। एतदुपाध्युपहिताधारभू ।१२३॥
तमनुपहितं प्रत्यगानंदं तुरीयं चैतन्यं त्वंपदलक्ष्यार्थो भवति। अथ महावाक्यार्थो वर्ण्यते। इदं तत्
त्वमसिवाक्यं संबंधत्रयेणाखंडार्थबोधकं भवति। संबंधत्रयं नाम। पदयोः सामानाधिकरण्यप

त्मशुद्धबुद्धमुक्तसत्यस्वभावं प्रत्यक्चैतन्यमेवात्मतत्त्वमिति वेदांतवि
द्वदनुभवः। एवमध्यारोपः। अपवादो नाम। रज्जुविवर्त्तस्य सर्पस्य रज्जुमात्रत्व
वद्वस्तुविवर्त्तस्यावस्तुनोऽज्ञानादेः प्रपंचस्य वस्तुमात्रत्वं। तथाहि। एतद्भोगायतनं
चतुर्विधस्थूलशरीरजातं भोग्यरूपान्नपानादिकमेतदायतनभूतभूरादिचतुर्दश
भुवनानि। एतदायतनभूतं ब्रह्मांडं चैतत्सर्वमेतेषां कारणरूपं पंचीकृतभूतमात्रं भव
ति। एतानि शब्दादिविषयसहितानि पंचीकृतभूतान्यपि सूक्ष्मशरीरजातं चैतत्स
र्वमेतेषां कारणरूपाऽपंचीकृतभूतमात्रं भवति। एतानि सत्वादिगुणसहितान्य
पंचीकृतान्युत्पत्तिव्युत्क्रमेणैतत्कारणभूताज्ञानोपहितचैतन्यमात्रं भवति। एतदज्ञानम

सर्वाभावादहं सुषुप्तो नासमित्युत्थितस्य स्वाभावपरामर्शविषयानुभवाच्च
शून्यमात्मेति वदति। एतेषां पुत्रादीनामनात्मत्वमुच्यते। एतैर्भ्रांतवादि वेदांत
भिरुक्तेषु श्रुतियुक्त्यनुभवाभासेषु पूर्वपूर्वोक्तश्रुतियुक्त्यनुभवाभासानामु सार
त्तरोत्तरश्रुतियुक्त्यनुभवाभासैर्बाधदर्शनात्पुत्रादीनामनात्मत्वं स्पष्टमेव।
किंच प्रत्यगस्थूलोऽचक्षुरप्राणोऽमनाऽकर्त्ता चैतन्यं चिन्मात्रं सदित्यादिप्रब ॥१२॥
लश्रुतिविरोधादस्य पुत्रादिशून्यपर्यंतस्य चैतन्यभास्यत्वेन घटादिवदनि
त्यत्वात्। अहं ब्रह्मेति विद्वदनुभवप्राबल्याच्च श्रुतियुक्त्यनुभवाभासानां बा
धितत्वादपि पुत्रादिपुत्रादिशून्यपर्यंतमखिलमनात्मैव। अतस्तद्भासकं नि

अन्यस्तु चार्वाकोऽन्योऽन्तर आत्मा मनोमय इत्यादिश्रुतेः। मनसि सुप्ते प्राणादेर
भावात्। अहं संकल्पवानहं विकल्पवानित्याद्यनुभवाच्च मन आत्मेति वदति।
बौद्धस्तु अन्योऽन्तर आत्मा विज्ञानमय इत्यादिश्रुतेः। कर्तुरभावे करणस्य शक्त्यभा
वात्। अहं कर्ताहं भोक्तेत्याद्यनुभवाच्च बुद्धिरात्मेति वदति। प्राभाकरतार्किकावन्यो
ऽन्तर आत्मानंदमय इत्यादिश्रुतेः। बुद्ध्यादीनामज्ञाने लयदर्शनात्। अहमज्ञोहम
ज्ञानीत्याद्यनुभवाच्चाज्ञानमात्मेति वदतः। भाट्टस्तु प्रज्ञानघन एवानंदमय इत्यादि
श्रुतेः। सुषुप्तौ प्रकाशाप्रकाशसद्भावान्मामहं न जानामीत्याद्यनुभवाच्चाज्ञानोपहि
तं चैतन्यमात्मेति वदति। अपरो बौद्धोऽसदेवेदमग्र आसीदित्यादिश्रुतेः। सुषुप्तौ

नष्टश्चेत्याद्यनुभवात्पुत्र आत्मेति वदति। चार्वाकस्तु स वा एष पुरुषोऽ
न्नरसमय इत्यादिश्रुतेः। प्रदीप्तगृहात्स्वपुत्रं परित्यज्यापि स्वस्य नि
र्गमदर्शनात्। स्थूलोहं कृशोहमित्याद्यनुभवाच्च स्थूलशरीरमात्मेति
वदति। अपरश्चार्वाकस्ते ह प्राणाः प्रजापतिमेत्य ब्रूयुरित्यादिश्रु — वेदांत सार
तेः। इन्द्रियाणामभावे शरीरचलनाभावात्। काणोऽहं बधिरोऽहमित्या
द्यनुभवाच्चेन्द्रियाण्यात्मेति वदति। अपरश्चार्वाकोऽन्योऽन्तर आत्मा प्रा ।२१।
णमय इत्यादिश्रुतेः। प्राणाभावे इन्द्रियादिचलनायोगात्। अहम
शनायावानहं पिपासावानित्याद्यनुभवाच्च प्राण आत्मेति वदति

यथाऽवांतरजलाशयानां समष्टिरेको महान्जलाशयः। एतदुपहि
तं वैश्वानरादीश्वरपर्यंतं चैतन्यमपि अवांतरवनावच्छिन्नाकाशवद
वांतरजलाशयगतप्रतिबिंबाकाशवच्चैकमेव। आभ्यां महाप्रपंच
तदुपहितचैतन्याभ्यां तप्तायःपिंडवदविविक्तं सदनुपहितं चैतन्यं
सर्वं ब्रह्मेति वाक्यस्य वाच्यं भवति। विविक्तं सल्लक्ष्यमपि भवति। ए
वं वस्तुन्यवस्त्वारोपः सामान्येन प्रदर्शितः। इदानीं प्रत्यगात्मनीद
मिदमयमयमारोपयतीति विशेषत उच्यते। अतिप्राकृतस्त्वात्मा वै पु
त्रादिश्रुतेः। स्वस्मिन्निव स्वपुत्रेऽपि प्रेमदर्शनात् पुत्रे पुष्टे नष्टे वाहमेव पुष्टो।

न्द्रियं त्रितेन वागादीन्द्रियपंचकेन क्रमात् वचनादानगमनविसर्गानं वेदांत
दान् चंद्रचतुर्मुखशंकराच्युतैः क्रमान्नियंत्रितेन मनोबुद्ध्यहंकारचित्ता सार
ख्येनांतरिंद्रियचतुष्केण क्रमात्संकल्पनिश्चयाहंकार्यचैत्यांश्च सर्वा
नेतान् स्थूलविषयाननुभवतः जागरितस्थानो बहिःप्रज्ञ इत्यादिश्रुतेः।
अत्राप्यनयोः स्थूलव्यष्टिसमष्ट्योस्तदुपहितयोर्विश्ववैश्वानरयोश्च वनव ।१०।
द्वृक्षवत्तदवच्छिन्नाकाशवच्च जलाशयजलवत्तद्गतप्रतिबिंबाकाशवच्च पू
र्ववदभेदः। एवं पंचीकृतभूतेभ्यः स्थूलप्रपंचो भवति। यथाऽवांतरवना
नां समष्टिरेकं महद्वनं। यथाऽवांतरजलाशयानां समष्टिरेको महान्।

यावन्नवज्ञानाशयवद्वासमष्टिः। इष्टवज्ञानवद्वाव्यष्टिरपि नवति।
एतत्समष्ट्युपहितं चैतन्यं वैश्वानरो विराडित्युच्यते। सर्वनराभिमानि
त्वाच्च। अस्यैषा स्थूलशरीरमन्नविकारत्वादन्नमयः कोशः। स्थूलभोगा
यतनत्वाज्जाग्रदिति व्यपदिश्यते। एतद्व्यष्ट्युपहितं चैतन्यं विश्व इत्युच्यते। सू
क्ष्मशरीरं अपरित्यज्य स्थूलशरीरादिप्रविष्टत्वात्। अस्याप्येषा स्थूलशरी
रमन्नविकारत्वादेव हेतोरन्नमयकोशो जाग्रदिति चोच्यते। तदानीमेतौ
विश्ववैश्वानरौ दिग्वातार्कप्रचेतोश्विभिः क्रमान्नियंत्रितेन श्रोत्रादीन्द्रियपं
चकेन क्रमाच्छब्दस्पर्शरूपरसगंधानग्नीन्द्रोपेन्द्रयमप्रजापतिभिः क्रमा

रगंधाश्च। एतेभ्यः पंचीकृतेभ्यो भूर्भुवःस्वर्महर्जनस्तपःसत्यमित्येत
न्नामकानामुपर्युपरि विद्यमानानामतलवितलसुतलरसातलतला
तलमहातलपातालनामकानामधोधो विद्यमानानां लोकानां ब्रह्मांड वेदांत
स्य चतुर्विधस्थूलशरीराणामन्नपानादीनां चोत्पत्तिर्भवति। शरीराणि सार
तु जरायुजांडजस्वेदजोद्भिज्जाख्यानि॥ जरायुजानि जरायुभ्यो जातानि म ।८।
नुष्यपश्वादीनि। अंडजानि अंडेभ्यो जातानि पक्षिपन्नगादीनि। स्वेद
जानि स्वेदाज्जातानि यूकामशकादीनि। उद्भिज्जानि भूमिमुद्भिद्य जाता
नि लतावृक्षादीनि। अत्रापि चतुर्विधस्थूलशरीरमेकानेकबुद्धिविषयत

एवं सूक्ष्मशरीरोत्पत्तिः। स्थूलभूतानि तु पंचीकृतानि। पंचीकरणं तु।
आकाशादिपंचस्वेकैकं द्विधा समं विभज्य तेषु दशसु भागेषु प्राथमि
कान् पंच भागान् प्रत्येकं चतुर्धा समं विभज्य तेषां चतुर्णां भागानां
स्वस्वभागपरित्यागेन भागांतरेषु संयोजनं। अस्याप्रामाण्यं नाशंकनी
यं त्रिवृत्करणश्रुतेः। पंचीकरणस्याप्युपलक्षणत्वात्। पंचानां पंचात्म
कत्वे समानेपि वैशेष्यात्तद्वादस्तद्वाद इति न्यायेनाकाशादिव्यपदेश
भेदः संभवति। तदानीमाकाशे शब्दोभिव्यज्यते। वायौ शब्दस्पर्शौ। अग्नौ
शब्दस्पर्शरूपाणि। अप्सु शब्दस्पर्शरूपरसाः। पृथिव्यां शब्दस्पर्शरूप

नमयादिकोशत्रयं जाग्रद्वासनामयत्वात्स्वप्नः। अत एव स्थूलशरीरल
यस्थानमिति चोच्यते। एतद्व्यष्ट्युपहितं चैतन्यं तैजसो भवति। तेजोमयांतः
करणोपहितत्वात्। अस्यापीयं व्यष्टिः स्थूलशरीरापेक्षया सूक्ष्मत्वादिति
हेतोरेव सूक्ष्मशरीरम्। विज्ञानमयादिकोशत्रयं। जाग्रद्वासनामयत्वा
त्स्वप्नः। अत एव स्थूलशरीरलयस्थानमिति चोच्यते। एतौ सूत्रात्मतैजसा
विदानीं मनोवृत्तिभिः सूक्ष्मविषयाननुभवतः। प्रविविक्तभुक्तैजस
इत्यादिश्रुतेः। अत्रापि व्यष्टिसमष्ट्योस्तदुपहितसूत्रात्मतैजसयोर्वन
वृक्षवत्तदवच्छिन्नाकाशवच्च जलाशयजलवत्तद्गतप्रतिबिंबाकाशवच्चाभेदः

क्रियात्मकत्वेनरजोंशकार्यत्वम्। एतेषु कोशेषु मध्ये विज्ञानमयो
ज्ञानशक्तिमान् कर्तृरूपः। मनोमय इच्छाशक्तिमान् करणरूपः। प्रा
णमयः क्रियाशक्तिमान् कार्यरूपः। योग्यत्वादेवमेतेषां विभाग इति वर्ण
यंति। एतत्कोशत्रयं मिलितं सत् सूक्ष्मशरीरमित्युच्यते। अत्राप्यखिलसूक्ष्म
शरीरमेकबुद्धिविषयतया वनवज्जलाशयवद्वा समष्टिः। अनेकबुद्धिवि
षयतया वृक्षवज्जलवद्वा व्यष्टिरिति भवति। एतत्समष्ट्युपहितं चैतन्यं सूत्रा
त्मा हिरण्यगर्भः प्राणश्चोच्यते। सर्वत्रानुस्यूतत्वात् ज्ञानक्रियाशक्त्यु
पहितत्वाच्च। अस्यैषा समष्टिः स्थूलप्रपंचापेक्षया सूक्ष्मत्वात् सूक्ष्मशरीरं विज्ञा

दानपाद्यादिस्थानवर्ती व्यानो नाम विष्वग्गमनवानखिलशरीरवर्ती।
उदानो नाम कंठस्थानीय ऊर्ध्वगमनवानुत्क्रमणवायुः। समानः शरीर
मध्यगताशितपीतान्नादिसमीकरणकरः। केचित्तु नागकूर्मकृकलदे वेदांत
वदत्तधनंजयाख्याः पंचान्ये वायवः संतीति वदंति। नाग उद्गिरणकरः। सार
कूर्म उन्मीलनकरः। कृकलः क्षुधाकरः। देवदत्तो जृंभणकरः। धनंजयः १७
पोषणकरः। एतेषां प्राणादिष्वंतर्भावात् प्राणादयः पंचैवेति केचित्। एत
त्प्राणादिपंचकं आकाशादिष्वंतर्गतरजोंशेभ्यो मिलितेभ्य उत्पद्यते।
इदं प्राणादिपंचकं कर्मेंद्रियैः सहितं सत् प्राणमयः कोशो भवति। अस्य

न्तःकरणवृत्तिः। अनयोरेव चित्ताहंकारयोरंतर्भावः। एते पुनराकाशादि
गतसात्विकांशेभ्यो मिलितेभ्य उत्पद्यंते। एतेषां प्रकाशात्मकत्वात्सात्विकां
शकार्यत्वम्। इयं बुद्धिर्ज्ञानेंद्रियैः सहिता सती विज्ञानमयकोशो भवति।
अयं कर्तृत्वभोक्तृत्वाद्यभिमानित्वेनेहलोकपरलोकगामी व्यावहारिको
जीव इत्युच्यते। मनस्तु ज्ञानेंद्रियैः सहितं सन्मनोमयकोशो भवति। कर्मे
द्रियाणि वाक्पाणिपादपायूपस्थाख्यानि। एतानि पुनराकाशादीनां रजो
ंशेभ्यो व्यस्तेभ्यः पृथक्पृथक्क्रमेणोत्पद्यंते। वायवः प्राणापानव्यानोदानस
मानाः। प्राणो नाम प्राग्गमनवान्नासाग्रस्थानवर्ती। अपानो नाम अवाग्गमन

काशाः संहृतद्वात्पादिभूतेः। तेषु जाड्याधिक्यदर्शनात्तमःप्राधान्यं तत्का वेदांतसा
रणस्य। तदानीं सत्वरजस्तमांसि कारणगुणप्रक्रमेण एतेष्वाकाशादिषूत्प र
द्यंते। एतान्येव सूक्ष्मभूतानि तन्मात्राण्यपंचीकृतानि चोच्यंते। एतेभ्यः सूक्ष्म
शरीराणि स्थूलभूतानि चोत्पद्यंते। सूक्ष्मशरीराणि सप्तदशावयवानि लिं
गशरीराणि। अवयवास्तु ज्ञानेंद्रियपंचकं बुद्धिमनसी कर्मेंद्रियपंचकं। ६॥
वायुपंचकं चेति। ज्ञानेंद्रियाणि श्रोत्रत्वक्चक्षुर्जिह्वाघ्राणाख्यानि। ए
तान्याकाशादीनां सात्विकांशेभ्यो व्यस्तेभ्यः पृथक्पृथक्क्रमेणोत्पद्यंते।
बुद्धिर्नाम निश्चयात्मिकांतःकरणवृत्तिः। मनो नाम संकल्पविकल्पात्मिका

नेनावृतायां रज्जौ सर्पादिकमुद्भावयति। विक्षेपशक्तिस्तु यथा रज्ज्वज्ञानं स्वा
वृतरज्जौ स्वशक्त्या सर्पादिकमुद्भावयति। एवमज्ञानमपि स्वावृतात्मनि स्व
शक्त्या आकाशादिप्रपंचमुद्भावयति। तादृशं सामर्थ्यम्। तदुक्तम्॥ वि
क्षेपशक्तिर्लिंगादिब्रह्मांडांतं जगत्सृजेदिति। वि। शक्तिद्वयवदज्ञानोपहितं चै
तन्यं स्वप्रधानतया निमित्तं स्वोपाधिप्रधानतयोपादानं च भवति। यथा लू
ता तंतुकार्यं प्रति स्वप्रधानतया निमित्तं स्वशरीरप्रधानतयोपादानं च
भवति। तमःप्रधानविक्षेपशक्तिमदज्ञानोपहितचैतन्यादाकाशः। आकाशा
द्वायुर्वायोरग्निरग्नेरापः अद्भ्यः पृथिवी चोत्पद्यते। तस्माद्वा एतस्मादात्मन आ

चतुर्थं मन्यंत इत्यादिश्रुतेः। इदमेव तुरीयं शुद्धचैतन्यमज्ञानादितदुपहितचै
तन्याभ्यां तप्तायःपिंडवदविविक्तं सन्महावाक्यस्य वाच्यम्। विविक्तं सल्लक्ष्यमिति
चोच्यते। अस्याज्ञानस्यावरणविक्षेपनामकमस्ति शक्तिद्वयम्। आवरणशक्ति
स्तावदल्पोपि मेघोऽनेकयोजनायतमादित्यमंडलमवलोकयितृनयनपथपि वेदांत
धायकतया छादयतीव। तथाज्ञानं परिच्छिन्नमपि आत्मानमपरिच्छि सार
न्नमसंसारिणमवलोकयितृबुद्धिपिधायकतया छादयतीव तादृशं साम ।५।
र्थ्यम्। तदुक्तम्। घनछन्नदृष्टिर्घनछन्नमर्कमिति। अनयावृतस्यात्मनः
कर्तृत्वभोक्तृत्वसुखित्वदुःखित्वादिसंसारभावना अपि भवति। यथा स्वाज्ञा

लयस्थानमिति चोच्यते। तदानीमेतावीश्वरप्राज्ञौ चैतन्यदीप्ताभिरतिसूक्ष्माभिरज्ञा
नवृत्तिभिरानंदमनुभवतः। आनंदभुक्चेतोमुखः प्राज्ञ इत्यादिश्रुतेः। सुखमह
मस्वाप्सं न किंचिदवेदिषमित्युत्थितस्य परामर्शोपपत्तेश्च। अनयोर्व्यष्टिसम
ष्ट्योर्वनवृक्षयोरिव जलाशयजलयोरिवाभेदः। एतदुपहितयोरीश्वरप्राज्ञ
योरपि वनवृक्षावच्छिन्नाकाशयोरिव जलाशयजलगतप्रतिबिंबाकाशयो
रिवाभेदः। एष सर्वेश्वर इत्यादिश्रुतेः। वनवृक्षतदवच्छिन्नाकाशयोर्जला
शयजलतद्गतप्रतिबिंबाकाशयोर्वा आधारानुपहिताकाशवदनयोरज्ञानतदु
पहितचैतन्ययोराधारभूतं यदनुपहितं चैतन्यं तत्तुरीयमित्युच्यते। शिवं शांतमद्वैतं

ष्ट्यभिप्रायेण वृक्षा इत्यनेकत्वव्यपदेशः। यथा वा जलानां समष्ट्यभि
प्रायेण जलानीति। तथाऽज्ञानस्य व्यष्ट्यभिप्रायेण तदनेकत्वव्यपदेशः।
इन्द्रो मायाभिः पुरुरूप ईयत इत्यादिश्रुतेः। अत्र व्यस्तसमस्तव्यापित्वेन वेदांतसा
व्यष्टिसमष्टिताव्यपदेशः। इयं व्यष्टिर्निकृष्टोपाधितया मलिनसत्वप्रधा २
ना। एतदुपहितं चैतन्यमल्पज्ञत्वानीश्वरत्वादिगुणकं प्राज्ञ इत्युच्यते एका ॥८॥
ज्ञानावभासकत्वादस्य प्राज्ञत्वमस्पष्टोपाधितयाऽनतिप्रकाशकत्वादस्या
प्ययमहंकारादिकारणत्वात्कारणशरीरमानंदप्रचुरत्वात्कोशवदाछा
दकत्वाच्चानंदमयकोशः। सर्वोपरमत्वात्सुषुप्तिरत एव स्थूलसूक्ष्मशरीर

यथा वा जलानां समष्ट्यभिप्रायेण जलाशय इति । तथा नानात्वेन प्रतिभा-
समानानां जीवगतानामज्ञानानां समष्ट्यभिप्रायेण तदेकत्वव्यपदेशः । अ-
जामेकामित्यादिश्रुतेः । इयं समष्टिरुत्कृष्टोपाधितया विशुद्धसत्वप्रधाना ।
एतदुपहितं चैतन्यं सर्वज्ञत्वसर्वेश्वरत्वसर्वनियंतृत्वादिगुणकमव्यक्तमंत-
र्यामी जगत्कारणमीश्वर इति व्यपदिश्यते । सकलाज्ञानावभासकत्वा-
त् । यः सर्वज्ञः सर्ववित् इत्यादिश्रुतेः । ईश्वरस्येयं समष्टिरखिलकारणत्वात्का-
रणशरीरमानंदप्रचुरत्वात् कोशवदाच्छादकत्वाच्चानंदमयकोशः सर्वोप-
रमत्वात् सुषुप्तिरत एव स्थूलसूक्ष्मप्रपंचलयस्थानमिति चोच्यते । यथा वनस्य व्य-

वस्तुविवेकेहामुत्रार्थभोगविरागशमादिसंपन्मुमुक्षुत्वानि । नित्यानित्यवस्तुवि- वेदांत
वेकस्तावत् ब्रह्मैव नित्यं वस्तु ततोन्यदखिलमनित्यमिति विवेचनम् । ऐहिकानां सार
स्रक्चंदनादिविषयभोगानां कर्मजन्यतया अनित्यत्ववदामुष्मिकाणामप्यमृता-
दिविषयभोगानामनित्यतया तेभ्यो नितरां विरतिरिहामुत्रार्थभोगविरागः । शमा-
दयस्तु शमदमोपरतितितिक्षासमाधानश्रद्धाः । शमस्तावत् श्रवणादिव्यतिरिक्त-
विषयेभ्यो मनसो निग्रहः । दमो बाह्येंद्रियाणां तद्व्यतिरिक्तविषयेभ्यो निवर्तनम् । ।।२।।
निवर्तितानां तेषां तद्व्यतिरिक्तविषयेभ्य उपरमणमुपरतिः अथवा विहितानां क-
र्मणां विधिना परित्यागः । तितिक्षा शीतोष्णादिद्वंद्वसहिष्णुता । निगृहीतस्य मनसः

साधनसंपन्नः प्रमाता। काम्यानि स्वर्गादीष्टसाधनानि ज्योतिष्टोमादीनि। नि-
षिद्धानि नरकाद्यनिष्टसाधनानि ब्रह्महननादीनि। नित्यान्यकरणे प्रत्यवाय
साधनानि संध्यावंदनादीनि। नैमित्तिकानि पुत्रजन्माद्यनुबंधीनि जातेष्ट्यादी
नि। प्रायश्चित्तानि पापक्षयसाधनानि चांद्रायणादीनि। उपासनानि सगुणब्र
ह्मविषयमानसव्यापाररूपाणि शांडिल्यविद्यादीनि। एतेषां नित्यादीनां बुद्धिशु
द्धिः परं प्रयोजनम्। उपासनानां तु चित्तैकाग्र्यम्। विविदिषंति यज्ञेनेत्यादिश्रुतेः। तप
सा कल्मषं हंतीत्यादिस्मृतेश्च। नित्यनैमित्तिकयोरुपासनानां चावांतरफलं पितृलो
कसत्यलोकप्राप्तिः। कर्मणा पितृलोको विद्यया देवलोक इत्यादिश्रुतेः। साधनानि नित्यानित्य

श्रीगणेशाय नमः॥ ॥ अखंडं सच्चिदानंदमवाङ्मनसगोचरं। आत्मानम
खिलाधारमाश्रयेऽभीष्टसिद्धये॥१॥ अर्थतोऽप्यद्वयानंदानतीतद्वैतभान
तो गुरूनाराध्य वेदांतसारं वक्ष्ये यथामति॥२॥ वेदांतो नामोपनिषत्प्रमाणं त
दुपकारीणि शारीरकसूत्रादीनि च। अस्य वेदांतप्रकरणत्वात्तदीयैरेवानुबं
धैस्तद्वत्तासिद्धेर्न ते पृथगालोचनीयाः। तत्रानुबंधो नामाधिकारिविषयसं
बंधप्रयोजनानि। अधिकारी तु विधिवदधीतवेदवेदांगत्वेनापाततोऽधिग
ताखिलवेदार्थोऽस्मिन् जन्मनि जन्मांतरे वा काम्यनिषिद्धवर्जनपुरःसरं नित्यनै
मित्तिकप्रायश्चित्तोपासनानुष्ठानेन निर्गतनिखिलकल्मषतया नितांतनिर्मलस्वांतः